नं० ४८२३

नाम- रुद्रयामलतंत्रे राधाकृष्णपञ्चाङ्गम्

कर्ता- x

पत्र- ३२ पत्राणि   सं० x

विषयः- तंत्रम्







ग. १ ॐ श्रीगणपाक्षमाभ्यां नमः ॐ मेरुपृ-
ष्ठसमासीनं देवदेवं महेश्वरं प्रसन्नवद-
नं देवं जटामुकुटमण्डितम् त्रिनेत्रं देवदे-
वेशं नागयज्ञोपवीतिनम् गजचर्मपरी-
धानं भूतिभूषितविग्रहं कपालमाला-
भरणं गंगावीचिविराजलम् इंद्रादिन-
मितैः देवैः सिद्धैरपि च पन्नगैः प्रहसन्तं
जपन्तं च ध्यायन्तं च मुहुर्मुहुः बद्धाञ्जलि-
पुटा देवी प्रणम्यादौ च भक्तितः उत्थाय
पार्वती प्राह स्मितपूर्वं ततः स्वयम् भग-
वंल्लोकथं हासः किं दृष्ट्वाश्चर्यपूर्वकम्
एतन्मे वद देवेश प्रसन्नो यदि मां प्रति
श्रीभैरव उवाच यो सौ नारायणो देवो
जगत्पातामिहादितः कंसादीन्दानवव

गाकालेन स्यादिजन्मनः हंतैककृत्नाव
तरगोपैर्वैश्यैर्देवादिभिः सह नंदगोपगृहे
वैश्यवेशेन त्रितयात्रिकाः वंशी विभू
षितकरो क्रीडन्नेणाध्यायाः सह तस्य क्रीड
समालोक्य सममहेशस्य च जायते किं क
थयामास कैकस्य मनः प्रत्ययो भवतः
रमयति गोपवधूटीः कंजजन्मदौरीपरं ब्रह्म
श्रन्याश्चर्यरसोल्लासविलासोत्फुल्ललो
चनः देवि हर्षवपादस्मि क्रीडां वीक्ष्य ज
गत्पतेः श्रीदेव्युवाच एहि शीघ्रं यदिहा
स्ते सममन्यत्रोमहेश्वरः राधाकृष्णस्य दे
वस्य गोपवेशस्य शंकरः क्रीडां समपूर्वां
संवीक्ष्य मन्त्रापि दर्शय प्रभो श्रीभैरवः
राधाकृष्णस्य विधानेयाधिं शान्तरीक्ष्नतः

रा॰ स्फुतिभृग्विरमायान्वितावन्हिभूशान्तंकृतः
२ श्रीदेव्युवाच प्रसन्नोयदिदेवेशमयिहृदि
कृपामयी ऊरुस्थानोदर्शयमेविद्याविंशति
हंरीं स्फुता तथाकुलस्यदेवस्यपंचागम
पिमेवद यथाताज्ञासतेदेवेह्यामोल्लास
विलासिनी भवाटवीदेवभूयांनतस्मात
क्रियांमियां श्रीभैरवउवाच शाक्तिश्री
कामबीजायकुलायपदमेवच सोवि
दायततेताराद्याविघ्नांतेचवल्लभः ऊंता
हिं दांतेमंत्रोयंकार्तितोनरवद्यर्णकः
प्रसजापार्थदेवेशिपंचांगप्राप्यदेवता
पांश्रीझं विनत्वंतिस्रश्वरोभिस्महदिवि
ऋषिर्वैलाचगायत्रीछंदोकुलस्थदेवता
कामबीजरमाशक्तिः मायाकीलकमीरि

त्तम् चतुर्वर्गफलप्राप्तावि नियोगः प्रकी
र्तिताः इंद्राद्या देवताः सर्वाः स्वस्वबीजपुर
क्रमात् चतुर्थ्यंतेषु संपूज्याः सर्वा दिदशादि
ष्वपि विहगेंद्रं पूजयेद्देवि नंदभद्रसमीक्रमा
न् गोपालानुत्तमाद्देवि विमृजयेच्छक्तिसंपु
तान् चतुर्थ्यंतेषु संपूज्याः शंखचक्रगदांबु
जा ग्रहकोणेषु संपूज्या रमाबीजेन संपुता
रुक्मिणी सत्यभामा च नाग्निजित्या सुनंद
या संपुतामित्रविंदा च तथा चैव सुलक्ष
णा जांबवती सुशीला च रमाबीजोपल
क्षिता कामदेवः पुष्पबाणः प्रद्युम्नश्च वि
धलया कामबीजपुतापते संपूज्यांते बे
हिर्क्रमात् विंडश्योहाटकस्वस्वधीमः
सर्वांगेषु हृदं दत्तौ मूर्तिः ध्यानदूतैः प्री

रा० ३

नद्धेमामनघ्नः राधाश्लिष्टो माधवो मन्न
मूर्तिः इति यन्त्रसमुद्दिष्टं लग्नागेषु पल
विनम् राधाकृष्णस्य पंचांगं प्रत्येकं प्र
थमं क्रमात् अथ वक्ष्ये महाध्यानं राधा
माधवयोरिदं सहत्वा सर्वसंभूतिं प्राप्नुया
त्साधको नरः आरक्तोद्यानकल्पद्रुमत
लविलसत्स्वर्णरोलाभिहृद्यं श्रीरा॰
धाश्रंखिमानेकटिनटविलसद्दुङ्घ
टाघटाभ्याम् वंशीरंध्रान्तरं श्रीमखिक
मलगलद्धायुणाघूर्णमाने राधाश्रोत्
णाहर्षफुल्लनयनं वंदे सदा माधवम् यंत्रे
वक्ष्यामि देवेशि राधामाधवयोरिदम् स
र्वागमरहस्याख्यं सर्वहर्षप्रदं तथा
बिंदुं त्रिकोणवसुकोणमिश्रं ततः स

हृत्तं वसुपत्रयंत्रं श्रीषोडशारं वत्तरक्ष
युक्तं पत्राग्रहारं खं च रह स्पमेतव् पद्मम
ष्टपलाशं च चत्वरं वं वलल्लणाम् वत्त
हीं रं समापुत्रं कामगर्भितकर्णीनम्
सामान्ययंत्रमुद्दिष्टमेतत् हिं शारदरीश्रिये
श्रयवक्ष्ये महादेवि प्रयोगान्भोगमोद्
दान् यांविज्ञाय सगज्ञापुषे स्वर्यं भूर्णी
भोगदम् अपंगाद्वेवनं गान्तादीपान्स्वज्ञा
त्यसाधकः वर्णिलत्सं मन्त्रजप्त्वा प्रयोगः
सर्वसिद्धिदः शून्यालये मंत्रं जप्त्वा मयु
तं जपसंख्यया कामवीजं पुरस्कृत्य त्रि
योवैश्पा भवंति तं सिंदूरेण लिखेद्यंत्रं
मायावीजेन पूजयेत् मंत्रांतरेण संपू
ज्य उपचारैः क्रमेणतु अनिमादि विला

सिद्धिंसंप्राप्नुवन्तिनः ततः साधकोचण्ड
८ भावेनपरमुत्तममाश्रयात् रम्भाबीजेन
सहितंजप्त्वारण्येवटेतटे विंशम्भरी
णासंवद्धाश्रीकामः प्राप्नुयात्क्रियाम् ना
मबीजंप्रजप्यसाधकोथमूलके
सर्वान्शत्रून्रणेजित्वाप्राप्नुयान्मन्त्रसंप
दः वटेरण्येश्मशानेचशून्यागारेचतत्
सत्ये अर्धरात्रेसमध्याह्नेभस्वरणामा
रभेत् वर्णलक्षंजपेत्सम्यक्स्वरणाद्युत
मम् कृत्वातसाधकः पश्चात्सर्वकार्या
णिसाधयेत् जीवहीनोयथादेहःस
र्वकर्मसुनक्षमः भस्वरणहीनोया
नमन्त्रः फलदायकः भोगदास्तुचवे
देविसत्यंदायिनस्तुदः सिद्धिदामोक्ष

देमंत्रः परसायुज्यदायकः नास्यान्त-
रायेन क्लेशेन शौचनियमोपि वा सा-
क्षात्सिद्धिप्रदो ह्येषो मंत्रोयं भोगमोक्ष-
दा इत्येतत्पटलं गुह्यं सर्वतंत्रेषु गोपि-
तम् राधाराधनयोदेवि गुह्याद्गुह्य-
तरं परम् इति श्रीविश्वनाथसारोद्धा-
री तंत्रे श्रीराधाकल्पपटलं समाप्तम्
ॐ श्रीगुरवे नमः अथ पूजाविधिः ॐ
श्रीभैरव उवाच ॐ अधुना नित्यपूजा-
यां कथयामि यथापद्धतिम् गन्धधूपम-
यीं गोप्यां सकलागमनिश्चिताम् प्रा-
तः कृत्यमकृत्वा तु यो देवं भक्तितोर्च-
येत् तस्य पूजा तु विफला शौचहीना
यथा क्रिया तत्र श्रीमान्साधको बाले

गी॰
प॰
५

ततः प्राणायामेन लाडन्याय करचरणौ प्र-
क्षाल्यासने समुपविश्य निजशि-
रसि श्वेतवर्णेऽधोमुखे सहस्रदलकम-
लकर्णिकान्तर्गतसिंहासनोपरिस्थ-
ं सकलालंकारभूषितं ज्ञानानंदमुदि-
तमानसं सच्चिदानंदविग्रहं ध्यात्वा मा-
नसोपचारैः संपूज्य श्रीगुरुमंत्रं दश-
दा प्रजप्य प्रणमेद्यथा ॐ अखंडमंड-
लाकारं व्याप्तं येन चराचरम् तत्पदं दर्शि-
तं येन तस्मै श्रीगुरवे नमः इति गुरुं प्र-
णम्य मनसा तद्वामांकरहीत्वा गुरूपमा-
र्गशाखेष्टदेवं यथोक्तरूपं हृदि ध्यात्वा
मानसोपचारैः संपूज्य यथाशक्ति ज-
पं विधाय गुह्यातिगुह्यगोप्त्रीत्वं गृहा-

णास्मत्कृतं जपम् । सिद्धिर्भवतु मे देवि त्व
त्प्रसादान्महेश्वरि । इत्यनेन नत्वा तु पं जप
फलं देव्या वामहस्ते समर्प्य प्रातः प्रभृति
सायांतं सायादि प्रातरं ततः यत्करोमि
जगद्योनि तदस्तु तव पूजनम् । अजपा
जपं समर्प्य इति देव्याज्ञां प्रार्थ्य ॐ समु
द्रमेखले देवि पर्वतस्तनमंडले विष्णु
पत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे इ
ति संप्रार्थ्य श्वासानुसारेण तस्यां पादं
निधाय पदे पदे मूलं स्मरन् शरीरेप
मार्ज्यं बहिर्गत्वा उत्तिष्ठन्तु महाभूता ये भू
ताः भूमिपालकाः मलमूत्रे परित्यज्य
मम देहोपि न दीयते इति मलमूत्रे परि
त्यज्य ततो नद्यादौ गत्वा हस्तौ पादौ
प्रक्षाल्य ॐ क्लीं कामदेवाय सर्वजन

ए॰ क्रं॰ पृ॰ ५

6

मनोहंकाराय नमः इति दिक्तालिबन्धनाय यथो
क्तां गंगां प्रकल्प्य स्नानं कुर्याद्यथा ॐ त
त्सदद्य अमुकमासे अमुकपक्षे अमुकतिथौ
वासान्वितायाम् अमुकशर्माहं श्रीरामपा
हूसप्रीत्यर्थं स्नानं अहं करिष्ये इति संक
ल्पः स्वमूलमन्त्रेण दिकबन्धं गायत्र्या सा
निधाय स्वप्रवेशे जले अंकुशमुद्र
या सूर्यमंडलेभ्य आवाह्य ॐ गंगे च य
मुने चैव गोदावरि सरस्वति नर्मदे सिं
धुकावेरि जलेऽस्मिन् संनिधिं कुरु इति
सूर्यमंडलात्तीर्थानावाह्य मूलेन चव
प्रायाभिसंध्य धेनुमुद्रया प्रदर्श्य म
त्स्यमूलं स्मरन् जले त्रिर्निमज्यात्म
मूलं पठन् कुम्भमुद्रया हृदि त्रिर्जलेन त्वा
प यौनीवाससी परिधाय संध्यामार

मेत् ततस्सर्वप्राणायामंकुर्यात् त्रिरा
चम्य वामहस्ते नचुलकेन जलमादाय
दक्षिणहस्तेनाच्छाद्य हंयंरंलंवंइतिभौ
तिकमंत्रेणाद्भिरभिमंत्र्य मूलमन्त्र
रन्ध्रगलितोदकबिंदुभिः सप्तधाशिरः
प्रोक्ष्य दक्षिणहस्तस्थिता ततोंऽशेषाद्भि
र्घ्राय तेजोरूपंध्यात्वा इडयानीतनाया
देहांतर्नीत्वा पापंप्रक्षाल्य कृष्णवर्णंत
ज्जलंपापरूपंपिंगलयाविरेच्य पुरःक
ल्पितवज्रशिलायांवामेफडिति निक्षिपे
त् इत्यघमर्षणंविधाय मूलंदशधाज
प्त्वा ततोगायत्रींजपेत् ॐ ह्रींराधायैवि
द्महे क्लींमाधवायधीमहि क्लींराधामा
धवप्रचोदयात् इतिदशधाजप्त्वा ततः

रा: कृ: ८

हृद्यर्घ्यपात्रं च दत्वा श्रीदेवदेव्यौ विधिना
गायत्रीत्रितयं विभाव्य तत्र दिव्यौघमान
वौघसिद्धौघगतान्गुरून्संतर्प्य अमुकउ
हंनामपूर्वकं श्रीउहं तर्पयामि नमः पर
मउहंतर्पया परमेष्ठिउहंतर्पयामि न
मः जले श्रीचक्रं विभाव्य मूलं ओं ऐं ह्रीं श्रीं
क्लीं राधामाधवं तर्पयामि नमः इति त्रिः
संतर्प्य मूलेन त्रिवारं पित्रादितर्पणं वि
धाय गायत्रीमूलं यथाशक्त्या जप्त्वा ज
पं देवदेव्यौ समर्प्य संहारमुद्रया देवदे
व्यौ समर्प्य यागमंडपमागच्छेदिति सं
ध्याविधिः यागगेहमागत्य पादौ प्रक्षा
ल्य ओं द्वारदेवताभ्यो नमः ओं द्वारश्रियै
नमः इति द्वारं संपूज्य अपक्रामंतभूता

निष्पिशाचा येन तं ऋक्षकाः ये चात्र निवसंत्य
त्र देविता भविसंस्थिताः इति पठन्वामां
गतं कोच भूतेभ्यो निर्गममार्गं ददन्तः
प्रविश्य जलकलशं पवित्रभूमौ संस्था
प्य आसनशोधनं कुर्यात् यथा ओं अस्य श्री
आसनशोधनमंत्रस्य मेरुपृष्ठऋषिः सु
तलंछंदः कूर्मो देवता आसनशोधने विनि
योगः इत्यंजलिः मेरुपृष्ठऋषये नमः
शिरसि सुतलंछंदसे नमः मुखे कूर्मो देव
तायै नमः हृदि आसनशोधने विनियोगः
सर्वांगेषु इति विन्यस्य ओं पृथ्वि त्वया धृता
लोका देवि त्वं विष्णुना धृता त्वं च धारय मां
देवि पवित्रं कुरु चासनम् इति भूमिं प्रार्थ्य
ओं मंडूकाय नमः कालाग्निरुद्राय नमः

पा० क० ८

96

मूलप्रकृत्यैनमः ॐह्रींआधारशक्त्यैनमः
ॐकमलासनायनमः इत्यासनंसंपूज्य
अपसर्पन्तुतेभूतायेभूताभुविसंस्थिताः ये
भूताविघ्नकर्तारस्तेनश्यन्तुशिवाज्ञया
पापाऽकारिणोभूताभूताभूम्यन्तरिक्षगाः
दिव्यलोकेस्थितायेचतेनश्यन्तुशिवा
ज्ञया भूताःप्रेताःपिशाचाश्चराक्षसाश्च
सरीसृपाः अपसर्पन्तुतेसर्वेदिव्यास्त्रे-
णैवताडिताः इतित्रिविधान्विघ्नान्
उत्सार्यपार्ष्णिघातेनदशभिश्छोटिका
भिश्चोत्सार्यप्राणायामंकुर्यात् ततो
गुरुंध्यायेत् ॐगुरुर्ब्रह्मागुरुर्विष्णुर्गुरु
साक्षान्महेश्वरः गुरुरेवजगत्सर्वंतस्मै
श्रीगुरवेनमः गुरवेनमः परमगुरवेन

मः परमेष्टिगुरवेनमः परमाचार्यगु
रवेनमः ततः प्राणमनत्रयं मूलमंत्रा
यैः आत्मतत्त्वंशोधयामिस्वाहा १ मू॰
विद्यातत्त्वंशोधयामिस्वाहा २ मू॰ शि
वतत्त्वंशोधयामिस्वाहा ३ ततो धारणा
पंचकं यथा हृदयत्रूंइस्मांततंशोधया
मिनमः इतिस्वशरीरं शुष्कतृणप्रायं
ध्यायेदितिपार्थिवीधारणा ॐ रंहृदयग
रंइस्मांततंदाहयामिनमः इतिदहपा
दांगुष्ठादूर्ध्वज्जनकालाग्निनासर्वनिर्द
ग्धं भावयेत्स्वाग्नेयीभावना वंवंमरयदूं
द्वादशांतात्पतितेन शशांकामृतजलेनस
र्वमाप्लावयेदितिवारुणीभावना ततः
प्रचंडवायुनायत्किंचिन्नदग्धादिग्नतंभा

रा कृ· ५

वयेदितिवायवो नाहमस्मिनवान्योस्मि
ध्येयंवाऽत्रनविद्यते आनंदपदसंलीनं
मनःसमरसीगतमित्याकाशीभावना
इन्द्रधारणापंचकेनसर्वं निःशेषमवि-
द्याप्रपंचरहितंध्यात्वा प्राणप्रतिष्ठांकु
र्यात् ॐ ह्रीं क्रीं यं रं लं वं शं षं सं हं हंसः सो
हंसः ममप्राणाइहप्राणाः पुनः १९ म
मजीवइहस्थितः १९ ममसर्वेंद्रियाणि १९
ममवाङ्मनस्त्वः श्रोत्रजिह्वाघ्राणप्रा
णाइहैवागत्यसुखंचिरंतिष्ठंतुस्वाहा
इतिप्राणप्रतिष्ठांकृत्वा पूर्ववत्प्राणाया
मत्रयंकृत्वाचमनंच संकल्पपूर्वंन्यासं
कुर्यात् अस्यश्रीराधाकृष्णपूजामंत्र
स्य ब्रह्माऋषिः गायत्रंछंदः श्रीराधा

कृस्नोदेवता क्लींबीजं श्रींशक्तिः
ह्रींकीलकं श्रीतपावल्लभकृस्नपू
जायांविनियोगः ॐब्रह्मऋषयेनमः
शिरसि गायत्रंछंदसेनमोमुखे श्रीगो
पालकृस्नदेवतायेनमोहृदि क्लींबीजा
यनमोगुह्ये श्रींशक्तयेनमःपादयोः
ह्रींकीलकायेनमःसर्वांगेषुइतिवि
न्यस्यषडंगानिकुर्यात् ॐक्रांश्रांअंगु॰
ॐक्रींश्रींतर्ज॰ ॐक्रूंश्रूंम॰ ॐक्रैंश्रैंअना॰
ॐक्रःश्रःकरत॰ ॐक्रांश्रांहृ॰ ॐक्रींश्रीं
शिरसे॰ क्रूंश्रूंशिखा॰ क्रैंश्रैंकव॰ क्रः
श्रः अस्त्रायफट् ॐअथपीठन्यासः
ॐकामरूपपीठायअंगुष्ठाभ्यांनमः
ॐजालंधरपीठायतर्जनीभ्यांनमः ॐ
पूर्णगिरिपीठायमध्यमाभ्यांनमः

रा॰
कृ॰
१०

वाराणसीपीठायअनामिकाभ्यांनमः
मधुपुरीपीठायकनिष्ठकाभ्यांनमः अवं
तिकापीठायकरतलकरपृष्ठानमः
ॐअयहृदयादिन्यासः ॐकामरूपपी
ठायहृदयायनमः जालंधरपीठायशि
रसेस्वाहा पूर्णागिरिपीठायशिखायै
वषट् वाराणसीपीठायकवचायहुम्
मधुपुरीपीठायनेत्राभ्यांवौषट् अवंति
कापीठायअस्त्रायफट् इतिषडंगन्यासः
ततःकरन्यासंमातृकान्यासंवकृत्वा
अंआंइंईंउंऊंऋंॠंवामपादादारभ्यगु
ल्फांतं ऌंॡंएंऐंओंऔंअंअः दक्षपादा
दारभ्यगुल्फांतंयावत् कंखंगंघंङं गु
ल्फादारभ्यनाभिमूलांतं चंछंजंझं

दक्षगुल्फादारभ्य नाभिमूलान्तं टं ठं
डं ढं णं नाभ्यादि वामबाहुमूलान्तं तं
थं दं धं नं नाभ्यादि दक्षबाहुमूलान्तं पं
फं बं भं मं कक्षादि ककुदन्तं यं रं लं वं वा
मस्कंदादि वामकर्णान्तं शं षं सं हं दक्ष
स्कन्दादि दक्षकर्णान्तं लं क्षः शिरसः प्र
भृति पादपर्यन्तमिति त्रिः व्यापयेत् अं
कं खं गं घं ङं आं अंगु· इं चं छं जं झं ञं ईं त
र्जनी· उं टं ठं डं ढं णं ऊं मध्य· एं तं थं दं धं नं ऐं
अनामि· ओं पं फं बं भं मं औं कनिष्ठ· अं यं रं
लं वं शं षं सं हं लं क्षं अः करतलकरपृष्ठा
भ्यां नमः अं हृदयादिन्यासः अं नमः
शिरसि आं नमः मुखवृत्ते इं नमः दक्ष
नेत्रे ईं नमः वामे उं नमः दक्षकर्णे ऊं नमः

रा॰ क्र॰ ११

वामे ॠं नमः दत्तनासायां ऌं नमः वा
मायां ॡं नमः दत्तगंडे ॡं नमः वामे एं
नमः ऊर्ध्वोष्ठे ऐं नमः वामे ओं नमः ऊर्ध्वद
न्तपंक्तौ औं नमः अधोदन्तपंक्तौ अं नमः शि
रसि अः नमः मुखे कं खं गं घं ङं नम इति
दत्तबाहुसंधिषु चं छं जं झं ञं नम इति
वामबाहुसंधिषु टं ठं डं ढं णं नम इति द
त्तपादसंधिषु तं थं दं धं नं नम इति वाम
पादसंधिषु पं नमः दत्तपार्श्वे फं नमः वा
मे बं नमः पृष्ठे भं नमः नाभौ मं नमः जठ
रे यं नमः हृदि रं नमः दत्तांसे लं नमः क
कुदि वं नमः वामांसे शं नमः हृदादिद
त्तहस्ताग्रान्तं षं नमः हृदादिवामहस्ता
ग्रान्तं सं नमः दत्तपादाग्रान्तं हं नमः हृदा

दि वाम पार्श्वांतं लं नमः पादादि शिरः

पर्यंतं त्वः नमः शिरसः पाद पर्यंतं इति

त्रिर्व्यापयेत् ततो मूलमंत्रन्यासः ब्र

ह्माऋषिये नमः शिरसि गायत्रंछंदसे

नमः मुखे श्रीश्यामायैदेवतायै नमः हृ

दि क्लींबीजायै नमः गुह्ये श्रींशक्तियै नमः

पादयोः ह्रींकीलकायै नमः नाभौ जपे

विनियोगः सर्वांगेषु ॐ ह्रां ह्रीं मित्या

दिकरषडंगन्यासः न्यासं विधाय मूलमं

त्रमुच्चरन् देहशुद्धिं कृत्वा ॐ भक्ष्यापनं

कुर्यात् तत्र सामान्यार्घ्यं ईशाने विन्दुष

ट्कोणवृत्तभूपुरं च कृत्वा विलिख्य पीठे

भ्यो नम इति सम भ्यर्च्य तत्र ताल लिता

धारसं स्थाप्यरं वह्निमंडलाय दशकला

त्मने नम इति अग्रतः संपूज्य तत्र श्री चंद्रे

गा
कुं
१२

संस्थाप्य हृद्देणापियथादेविविसृजनादि
यथापुरा ब्रह्मणा वयथापूर्वं तथावं
स्थापयाम्यहम् इतिसंस्थाप्य अर्कमं
डलायद्वादशकलात्मनेनमः इतिगं
धाद्यनपुष्पैरभ्यर्च्य मूलं विलोममातृ
कयापरमामृतेनापूर्य सोः सोममंडला
यषोडशकलात्मनेनमः इतिसंपूज्य
अस्त्रायफट् इतिकलद्रव्यं संताड्य मूलं
मष्टस्वरत् नामस्यात्रिर्गीयं गृह्णीयात्
तत्रत्रिकोणं विलिख्य मूलं त्रिजप्त्वा सं
पूज्य ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः सपेशुक्रशा
पंमोचय २ अमृतं स्त्रावय २ स्वाहा इ
तिद्रव्योपरिदशधासंजप्य सूर्यमंडलसं
भूतेवरुणालयसंभवे अमाबीजमयि
देविशुक्रशापाद्विमुच्यताम् वेदानां

प्रणवो बीजं ब्रह्मानंदमयो यदि तेनम

स्त्येन हेदे वि ब्रह्महत्याव्यपोहत पाव-

मानः पवानंदः पावमानपरोरमः पाव

मानं परं तानंतं तेन नत्वा पावयाम्यहम् ३

ति त्रिर्जप्त्वा ॐ अं आं ईं अमृते अमृतोद्भवे

अमृतवर्षिणि अमृतं स्रावय स्रां ह्रीं अमृते

श्वर्यै नमः ३ इति द्रव्योपरि दशधा जप्त्वा पू

जां कुर्यात् फलादीन्समर्प्य गंधादिनपु

ष्पैः दशवारं मूलेन पूजां कृत्वा ॐ णां कृष्णाय

नमः क्लीं कामदेवाय नमः क्लीं पुष्पबा

णाय नमः ऐं प्रद्युम्नाय नमः ऐं भद्राय

नमः ऐं रुक्मिण्यै नमः ऐं सत्यभा

मायै नमः ऐं कालिंद्यै नमः ऐं सत्यायै

नमः ऐं मित्रविंदायै नमः ऐं लक्ष्मणा

यै नमः ऐं जांबवत्यै नमः ॐ ह्रीं शंखा

रा० क्र० २२

13

यनमः ऐं चक्रायनमः ऐं गदायन
मः ऐं पद्मायनमः ॐ नंदायनमः ऐं
भद्रायनमः मण्यैनमः इंद्रादिभ्यो
नमः अनंतादिभ्योनागेभ्योनमः आ
दित्यादिग्रहेभ्योनमः वज्राद्यस्त्रेभ्यः
फट् ततःपाद्यादिसकलपूजाकार्य
र्यां श्रीविंदुविभूषितत्रिकोणाष्टको
णावनपद्मत्रिवृत्तत्रयसंभूषितभूसद
नवतरम्यश्रीयंत्रेश्रीवाण्यादिपात्रैर्नि
वेद्यपदादिसदेवीकं देवंमानसैरुपचा
रैरभ्यर्च्य बाह्यपूजांकुर्यात् ॐ ह्रीं म
हुकायनमः ऐं कालाग्निरुद्रायनमः
ऐं मूलप्रकृत्यैनमः ऐं आधारशक्त्यैन
मः ऐं कूर्मायनमः अनंतायनमः व
राहायनमः पृथिव्यैनमः सुधार्णवा

यनमः मणिद्वीपायनमः पूर्वादिदि
क्षु धर्मायनमः पूर्वे ज्ञानायनमः द
क्षे वैराग्यायनमः पश्चिमे ऐश्वर्याय
नमः उत्तरे अधर्मायनमः आग्नेये अ
ज्ञानायनमः नैरृते अवैराग्यायनमः
वायवे अनैश्वर्यायनमः ईशाने सम
स्तायनमः रंरजसेनमः तंतमसेनमः
पद्मासनायनमः योगपीठायनमः
इतिपीठंसंपूज्य देवंध्यात्वा पुष्पांज
लिंसंगृह्य देवेशभक्तसुलभपरिवार
समन्वित यावत्वांपूजयिष्यामितावत्
देव इहावह इतिपुष्पांजलिंदिक्षा आ
वाहनादिमुद्राप्रदर्श्य श्रीराधाप्रिय
वलभदेव इहागच्छ २ संतिष्ठ २ स

ष्ठिपत्स्व २ स्वाहा ततः प्राणप्रतिष्ठा
आंह्रींक्रोंयंरंलंवंशंषंसंहंहंसःसोहंश्री
राधावल्लभप्राणाइहप्राणाः एवंसर्वेंद्रि
याणिवांमनस्त्वदःरसनाघ्राणप्राणाः
हागत्यसुखंचिरंतिष्ठंतुस्वाहा २ श्रीरा
धावल्लभइदमासनमास्यतां मूलम
त्रार्घ्यं पाद्याचमनीयमधुपर्कार्घ्यगंधपु
ष्पाक्षतधूपदीपनैवेद्यतांबूलछत्रचा
मरात्रिकादीन्निवेद्यप्रणाम्य कल्पोक्त
नेनसांगंसायुधंसपरिच्छदंसशक्तिकं
राधावल्लभंपूजयामिनमः तर्पयामिन
मः इतित्रिःसंतर्प्य देवात्तामादायपरि
वारदेवताःपूजयेत् पुष्पांजलिंदत्वा श्री
राधावल्लभश्रीकृष्णश्रीपादुकांपूजया

मितर्पयामिनमः इतिविदिशोप्रथमाव
रणम् ॐ ह्रीं कामदेवश्रीपादु० तर्प०
रैं पुष्पचापश्रीपा० न० रैं प्रद्युम्नश्रीपा०
पू० न० इतित्रिकोणेद्वितीयावरणम्
ॐ श्रीं रुक्मिणीपादु० न० रैं सत्यभा
माश्रीपा० न० रैं भद्राश्रीपा० न० रैं का
लिंदीपा० न० रैं श्रीसत्यापा० न० रैं मित्र
विंदापा० न० रैं लक्ष्मणापा० न० रैं जांब
वतीपादु० न० इत्यष्टकोणेतृतीयावर
णम् ॐ ह्रीं शंखश्रीपा० न० रैं श्रीचक्रपा०
न० रैं गदाश्रीपा० न० रैं पद्मश्रीपा० न०
इतिवृत्तचतुष्टयेचतुर्थावरणम् ॐ ह्रीं श्री
यशोदासहितनंदश्रीपा० न० रैं भद्रश्री
पा० न० रैं मणिश्रीपा० न० इतिवृत्तत्रयेपं

लं

श्री॰ कृ॰ पू॰ २५

वमावरणाम् शं मूलं इंद्रश्रीपा॰ न॰ रं र
वह्निश्रीपा॰ न॰ यं यमश्रीपाद॰ न॰ क्षं नि
र्ऋतिश्रीपा॰ न॰ वं वरुणश्रीपा॰ न॰ यं वा
युश्रीपा॰ न॰ कुं कुवेरश्रीपा॰ पू॰ न॰ हं ईशा
नश्रीपा॰ न॰ वज्रश्रीपा॰ न॰ शक्तिश्रीपा॰
न॰ दंडश्रीपा॰ न॰ खड्गश्रीपा॰ न॰ पाश
श्रीपा॰ न॰ ध्वजश्रीपा॰ न॰ गदाश्रीपा॰ न॰
त्रिशूलश्रीपा॰ न॰ इति बाह्यहारे षष्ठाव
रणाम् मूलं त्रिरुच्चार्य सांगंसवाहनंसा
युधंसपरिच्छदंशाधाक्षरलदेवं पूजयामि
नमः तर्पयामिनमः इतिसप्तमावरणं
इत्थं संपूज्य संतर्प्य योनिमुद्रयाप्रणमेत्
पुनर्नैवेद्याचमनीयतांबूलादीन्निवेद्य देवा
ग्रे मालांमूलेन संपूज्य यथाशक्तिं जप्त्वा

जपं तेन मालां शिरसि पूर्ववन्न्यासं प्राणायाम
ऋष्यादि करषडंगानि विधाय तर्पणं गु
ह्याति गुह्यगोप्त्रीत्वं गृहाणास्मत्कृतं जपं
सिद्धिर्भवतु मे देव त्वत्प्रसादान्ममप्रभो
इत्यादि देवाय जपं समर्प्य तदग्रे कवच
सहस्रनामस्तवराजपाठं तदपि देवाय
समर्प्य पुष्पांजलिं दत्वा नानारूपपुष्पमा
ल्यायकरं प्रसदवीकं देवं प्रापयित्वा पुनः
र्हृत्कमलमानीय स्वयमपि वैसवाचार
परः सर्वं विहरेत ॥ इति श्रीदेवदेव
स्य श्रीराधावल्लभस्यानेकसकपडन्य
नित्यपूजायां वर्णितायाः पुरस्मिदंप
रंतत्त्वं पूजासारं महेश्वरि गोपयेद्देस
वःसत्य मित्याता पारमेश्वरी इति श्री

रा॰ कृ॰ पू॰ १६

विश्वनाथसारोद्धारे तंत्रे श्रीराधाकृष्ण
नित्यपूजापद्धतिः समाप्तम् भद्रम्

ॐ अथ कवचं ॐ श्रीभैरवः अधुना क
थयिष्यामि राधाकृष्णस्य भैरवि क
वचं मंत्रगर्भं तु वज्रपंजरसंज्ञकम् र
हस्यं सर्वदेवानां मर्त्यानां च विशेषतः
अस्यैव धारणाच्चाहं सर्वतोऽस्मि महेश्व
रि यद्धारणात्सर्वज्ञो दोर्बला ह्यपि पृथ
विधाम् यं धृत्वा त्रिदशेंद्रत्वं प्रालेभे
पाकशासनः व्योम्नि प्रकाशने भानु
र्नित्यं यद्धारणाच्छ्रिये सर्वप्राणिनियं
तापि च भूव धर्मराज्यतः धनाध्यक्षः कु
बेरोऽभूद्यस्य संधारणादपि यस्मिं धृते

पाशहस्तोस्सलिलेशोवरुणोवह येयेषु
वंशानवेद्याः प्रबलाः कर्म्माणापिच अस्मे
वपारणान्सर्वैनेतेनीतान्मूर्तिमया शा
क्रयात्कोगणायितुं माहात्म्यमस्यवेश
रि विनानेन न सिद्धिः स्यादिहलोकेपर
त्रच कवचं यं समावध्य मंत्रजापं समाव
रेत् तेनैव मंत्रसिद्धिश्च जायते परमाजु
ता कवचस्यास्यदेवेशि ब्रह्माप्रोक्तोमुनि
स्तथा गायत्रं छंदः इत्युक्तं श्रीराधाप्रियव
ल्लभः देवतात्र परं वीजं मायायाः परमेश्व
रि रमाशक्तिः कामराजवीजं कीलकमी
रितम् चतुर्वर्गफलावाप्तौ विनियोगः प्र
कीर्तितः अथध्यानम् ध्यानं वक्ष्ये महादे
वि श्रीराधामाधवस्य च यद्ध्यात्वा मंत्रवि
न्मातोसिद्धिं प्राप्नोतिवेश्वरीम् श्रीमद्वा

रा. कृ. क. २

नकल्पकमविटपलसत् स्वर्णदोलादि
रूढं श्रीराधारिंखमानंकटिनटविल
सत्क्षुद्रघंटारवाढ्यम् वंशीरंध्रांतरश्री
मुखकमलगलद्वायुनापूर्यमाणं रा
धाप्रेक्षणाहर्षफुल्लनयनं वंदे सदा माध
वम् ॥ श्यामं पूर्णेन्दुवदनं वराभयल
सत्करम् राधाश्लिष्टतनुं कांतं मुक्तिदं
माधवं भजे ॥ ॐ ह्रीं मस्तकं माधवो
व्यात् क्लीं श्रीकृष्णो ललाटकम् पायान्ने
त्रे सदा पातु क्लीं गोविंदः समंततः श्रीरा
धावल्लभः पातु नासां मे भक्तवत्सलः
दामोदरो मुखं पातु वैकुंठः पातु कंठकं
वक्षः स्थलं सदा पायात् मम श्रीवत्सलां
छनः चतुर्भुजो भुजौ पातु हस्तौ रक्षतु

केशवः पार्श्वौ मम सदा पातु पूर्णेन्दु

निभाननः हृदयं मे ऽच्युतः पायान्मे ऽ

विश्वम्भरो मम पृष्ठं पातु पद्मना

भिः पङ्कजनाभिः मे रक्षतु श्रीमा

न्सर्वतो विष्टरश्रवाः शिरो मे श्रीशः सदा पा

यात्कटिं कैटभजित्तथा ऊरू त्रिविक्र

मः पातु जानू पातु जनार्दनः जङ्घे गदा

धरः पातु गुल्फौ मे गरुडध्वजः पादौ सह

स्रपात्पातु शेषः सकलं वपुः इन्द्रो मां

पूर्वतः पातु वह्निर्वह्नेः सदा मम यमो द

क्षिणतः पातु नैरृते निरृतिस्तथा वरुणः

पश्चिमे पायाद्वायव्ये वायुः सदा गतिः उ

त्तरे धनदः पायादैशान्यामीश्वरोऽवतु द

शदिक्षु सदा पातु श्रीरामो वल्लभः प्रभुः

रा० कृ० क० १८

196

प्रभाते पातु श्रीकृष्णो मध्याह्ने गोपवल्ल
भः सायं राधाप्रियः पातु प्रदोषे गोप
नीप्रियः अर्धरात्रे सदा पातु प्रत्यूषे भ
गवान्मम निशान्ते माधवः पातु विश्व
क्सेनस्तु सर्वतः रणे राजभये द्यूते वि
वादे शत्रुसंकटे ॐ ह्रीं श्रीं क्लीं सदा पा
तु श्रीराधावल्लभः प्रभुः ॥ ॐ ह्रीं श्रीं
गरुडध्वजः स्वामिमान्पायाद्रणे संकटे
श्रीकृष्णो भगवान्ममारिनिवहान्निधं
सयेन्नन्दणा ज्ञो विंदोवतु मां सदा हरि
भयाद्दाधप्रियो माधवः मां पापयाद्धिप
दः श्मशानगवरवराघ्राभयं सर्वतो
लोयोद्याज्वलनोद्भवादपि भयान्मां पा
तु गोपेश्वरः इतीदं कवचं दिव्यं वज्रपंज

रकाभिधम् सर्वसौभाग्यजननं सुखावहं
संततिप्रदम् लक्ष्मीसंवर्धनं देवि परमा-
श्चर्यरसायनम् मंत्रगर्भं परं सारं रहस्यं त्रि-
दिवौकसाम् त्रिसंध्यं यः पठेन्नित्यं क-
वचं प्रियतः पुमान् स याति परमं धाम वै-
ष्णवं साधकोत्तमः दशवारं पठेद्यस्तु रता-
दौ वैष्णवोत्तमः विष्णुभक्तिरतं पुत्रं प्राप्नो-
ति कुलदीपकम् रविवारे लिखेद्यस्तु
तिथ्यर्द्धे साधकोत्तमः गंधाष्टकेन विम-
ले भूर्जे रंध्रविहीनके लिखित्वा रक्तवस्त्रे-
ण संवेष्ट्य मंत्रं जपन् स्वर्णगुटिकाम-
ध्ये स्थापयित्वा विधानतः मूर्ध्नि तां धार-
येद्धीमान् श्रीगणाधिवल्लभं स्मरन् रणे रिपून्
जयित्वाशु वादे स्तुत्यो भविष्यति नारी

ग. कु. क. १५

19

रूपवंतीसाध्वीलभतेनात्रसंशयः एवं
ध्यात्वाकाकवंध्यावामृतवत्सापियो
गता साबध्नीयात्कंठदेशेलभेत्पुत्रांश्चि
रायुषः गुरूपदेशतोधृत्वागुरुंध्यात्वा
मनुंजपन् वर्णलक्षपुरश्चर्याःफलं
प्राप्नोतिसाधकः बहुनात्रकिमुक्तेन
कवचस्यास्यपार्वति विनानेननसि
द्धिःस्यान्मंत्रस्यास्यमहेश्वरि गोप्यंगो
प्यंमहादेविश्रीभाषाकुलसंभवम् व
ज्रपंजरकंवर्मगोपनीयंमहेश्वरि ह्रीं वि
नायकुलीनायशिष्यायगुणशालिने
दानवंश्यहृद्यानायकुलभक्तिरतायच
अभक्तायनदातव्यंऊवैलायपुत्रायमने
कृतायपरशिष्यायशठायपरमेश्वरि रह

स्तवकम् अवाच्यं भक्तिहीनीनां मम भक्ता

नां कैचेलिनाम् वक्तव्यं सहस्त्रनाना

मालिकानां महेश्वरि गुरूपदेशतो दे

वि भक्त्या नित्यं प्रपूजयेत् श्रीराधाव

लभं श्रीत्या विधिना साधको नरः पू

जयित्वा नरश्रेष्ठ कृष्णनामसहस्रकं

ध्यात्वा मनसि श्रीराधाकृष्णपादारविं

दकम् कुर्वीत पाठं मतिमान्सर्वसिद्धि

मवाप्नुयात् अस्य श्रीराधाकृष्णनाम

सहस्रस्य शिव ऋषिः अनुष्टुप्छंदः

श्रीराधाप्रियः श्रीकृष्णो देवता क्लीं

बीजं श्रीं शक्तिः ह्रीं कीलकं धर्मा

र्थकाममोक्षार्थे पाठे विनियोगः

ॐ अथ ध्यानम् श्यामं पूर्णेन्दुवदनं

रा॰ कृ॰ स॰ २१

वराभयलसत्करम् राधाश्लिष्टतनुं
कांतं भुक्तिदं माधवं भजे इति ध्यानं
ॐ राधेशो राधिकानाथो राधाहृत्सोर
मापतिः रामक्रीडारतो रामो विरामो
भूतनायकः भूतेशो वलभः प्राणोल
क्ष्मीनाथो महीपतिः सम्राट् समान
रः हंसः विश्वात्मा जगतां गुरुः माध
वो भक्तिलभ्यो रट् शांतः शांतिप्रदः
साक्षी गोपीनाथो महेशानो गोपीशो
गोपवलभः गोपीवृंदगतो भानुः म
हासेनो महामतिः वागीशः सर्वतत्त्व
ज्ञो सर्वज्ञो गोपनायकः नारायणो
महीभर्ता महानेता महाद्युतिः सक
लः सर्वसारज्ञो सर्वेशः शुभदायकः

स्यं सर्वसारांगोपनीयंस्वयोनिवत्
रक्षितव्यं श्रीविद्यासारोरात्रेनैव भैरवात्क्
सकवचंसमाप्तम् शुभम् ॥
ॐ श्री भैरवी भगवत्करुणाभोधे भक्ता
भीष्टफलप्रद रहस्यं प्रष्टुमिच्छामिय
त्वंपटसिसर्वदा यदिप्रियास्मिते त्वंवव
दकारुण्यपत्नोमम भैरवः पतद्रहस्यं
परमंसर्वाश्चाममसुंदरि अद्यावधिन
कस्यापिकथितंमिदमुत्तमम् अधु
नाकथयिष्यामिप्रीत्यानवमहेश्वरि
सर्वमंत्रमयंतत्वं सर्वागमरहस्यकम्
लक्ष्मीसंवर्धनंदेविशमनंपापकर्मा
णाम् पूजाफलप्रदंलोकेसुखदंसंत
तिप्रदम् पतिपत्न्योर्योगकरंविरहज्वर

रा॰ कृ॰ स॰ २॰

20

नशनम् श्रीराधामाधवाभिधं देवि
नामसहस्रकम् गोप्यं गुह्यतमं देवि
सर्वापद्विनिवारणम् यत्पाठादस्य व
देवेशः शक्रानुग्रहकारकः द्वि
तीयोस्मि देवेशि सर्वसंहतिकारकः
तत्पाठमहमेकांते करोमि सर्वदा प्रि
ये यत्पाठकारणाद्देवि मंत्रसिद्धिर्भ
विष्यति यः कश्चिन्मानवो लोके श्री
राधामाधवस्य च पठिष्यति शुचिर्भू
त्वा शुभनामसहस्रकम् तस्य नश्यं
ति पापानि पुण्यवृद्धिः प्रजायते यः
त्फलं सर्वयज्ञेषु सर्वतीर्थेषु यत्फलं
तत्फलं समवाप्नोति यत्पाठकरणा
त्प्रिये इदं रहस्यं परमं कृष्णनामसह

ज्ञानगम्योमुरारातिर्मुकुंदोमितविक्र
मः यज्ञोयज्ञायनिर्वाग्मीवार्धिशायी
रमासखः शेषाशेषधरःशान्तोविश्व
भूतेश्वरोमहान् वैकुंठोकल्मिनःश्री
मान्सनवमूर्तिरनेकपान् सहस्रशीर्षो
भगवानुपेंद्रोमधुसूदनः भक्तिगम्यो
भक्तिनाथ्योभक्ताभीष्टफलप्रदः भा
गवान्भगवानंदीभव्योभूतमहेश्वरः
कृष्णवर्णोमहाकायोहृष्टोगस्थविरः
त्मी महामान्योमहामार्गीमानीमा
नार्थदर्शकः समग्रःपार्थिवोव्यापी
कपिलोकोकिलध्वनिः कपीशार्च्योः
कलाभिन्नोःकलासारःकलानंदः
कांतःकमलपत्रादःकामेशःकामद

ग॰
छं॰
स॰
११

पभृत् कविः कालः कलेशानः कर्य
नुग्रहकारकः कलिद्वेषकरः काम्यः
कामनाफलदायकः कचद्यानकरः
काव्यः कवीकवचधारकः कजना
भिः कंजनेत्रः कटिसूत्रपरः शुभः
कंदोकठोरः काव्यार्थप्रातोगायाधि
यः प्रभुः कफघ्नः कंबुग्रीवोव्धाः कमू
र्तिकंपरस्तुतिः खिलारनोखलः सा
धुः खड्गपीखगगः खगाट गणेशोग
हनोगोपीगंभीरोगोमतीप्रियः गोदे
वोगोत्रलानंदीगोदोगरुडवाहनः
वाटकारप्रियः वापीवार्वंगसामरावि
नः वारुमूर्तिचरुभुवचरावरसमेवि
नः चामीकररुविच्छवंद्वादिन्यानेत्रः ख

यंप्रभः कृत्रशालीकात्रपूज्यकृत्र
चामरभूजितः जयशालीजपासक्तोज
पाकुसुमधारकः जटिलोजननोजीवदा
यीजयनशीलकः जंबूनदांकुशं जंतु
फलभोगेजयप्रदः जंघालोजंगमेशा
नोजराहीनोजरद्रवः जलशायीजग
न्नेताजगन्नाथजगत्प्रभुः फणभूपीसदार
म्योमहेष्वासोमहागतिः यमनेशोया
म्यगनिर्धमनोयमघातकः दमनोदांत
शीलश्चपीशोपीमतिवल्लभः वत्समा
लोमहादीव्योमहांगोमकराकृतिः सल
ललोलदलग्न्यालोभीवल्लवाणायजः
ललन्मालीलोलनेत्रोः सुकेशः स्त्री
मत्तांवरः तिलपुष्पेनसः शांतः दैत्यहा

रा॰ स॰ ५५

विश्रश्रवाः महाकायोः सदामर्षीपी
नवासाजनार्दनः समीरस्थोश्वक्रपाणि
र्विष्वक्सेनोच्युतोहरिः कांतिप्रदोत्ता
नगम्योव्यापकोगम्यो निरंजनः चतुर्भु
जः पद्महस्तः शंखपाणिर्जयीखगः
संवत्सरकरोमानी कालज्ञः कालभेद
नः महामात्रोमहादेवोवेदवेत्तोद्विजवल्ल
भः महाक्रमोमहाभीमोमहाभोगीम
हामनाः सर्वपापहरोमृत्युहरोकालां
तकारकः करणः कारणः कर्ताक्रि
येशः कर्मकारकः कौलिकागमतत्व
ज्ञः कौलिकाभीष्टदः स्वराट् कालेयद
मनोभीमः सर्वप्राणापहारकः वृषस्कं
धो महाभीरुः नक्रजिह्वमनःसुधिः

रवेर्वः रविसूर्विः रविटसुरविसूपीहृतव
मध्यगः कशायीकंजनयनोविश्वरू
पोविभावसुः अजन्मापफलदानाय
पद्मेषुः पद्मलोचनः मधुदानवजि
ष्णापीमंजूदोमितविक्रमः स्फीतो२
विश्वकलाक्रांतोमहामेरुर्महागतिः
आसीनोविश्वभृडर्नीदेवेनाः कमला
पतिः सोभाग्योभूतनाथस्यमहांगो
कपिलः स्वभूः उवीधनेगोपमूर्तिर्गो
क्लेशोसराविंतः रोहणोमध्यभामा
वमध्यनाडीप्रबोधकः क्लेशोवास
देवस्यमहामायोमनोरथः चक्रस्यचक्र
पूजस्यचक्रपाणिः क्रमानिगः क्रम
णः क्रांतिदलनः क्रांतिकालतपण

रा॰ कृ॰ सं॰ ५७

२५

रात् कैटभारिर्विलोन्मादीमहेंद्रोदमन
स्तथा हास्यतोहास्यकृद्रास्योः नित्यं
वृत्तश्रियोवसुः उपवीतधरोयतोयत
साध्योमहामुनिः गदाधरोमहावीरो
महात्माहोमनोगतिः मनोरथप्रदःशा
नः खिन्नः खिन्नः पिशाचहन् विमोघ
दलनोवायुर्वेगोगर्वांतकोमणिः
मणिभद्रोदिव्यमणिधरोवामनरूपधृ
त् ९भः कलावान्सर्वोमहाकांतोम
हेश्वरः समीरःशाश्वतोभीमःसर्वेशः
सकलार्थवित् विश्वसृद्वैश्वदेवस्वर
माच्छेरमणः दमी सर्वेभ्यःपुष्करा
स्वरज्ञांतकरःपरः वषट्कारःस्वधा
कारःस्वधारूपीमहामनः वोमनोवलि
जिह्वालोभालनेत्रःप्रसरत्कृत् भोजनो

जनजननो दीनो दीनार्तिहृत्कपिः
कपीशानुगतो वाग्मी दशकंदरघात
कः सलक्षणः समालेप्यो वनमाली
सवासनः पापहा कामरूपी वजपमं
त्रपरायणः आतपी वज्रमानी शोवि
श्वधृग्विश्वजिद्विभुः विश्वरूपी महीपा
लो रत्नी ब्रह्मसनंगगतिः पवनः परमे
शानः पावनः पावकः पुमान् पवि
भृदनुजो पाप्मा पाकशासनवैरिहा
पद्मात्मा पररूपी च परापरवपुर्धरः प
यप्रकृतिनाथश्च प्रजेशः पुण्यकार
कः प्रतारकोऽप्रमेयात्मा प्रवाली प्रव
लोपरः प्रलीनः प्रकृतिः कालः प्र
लोभी प्रमथाधिपः प्रमार्जकः प्रका
लनः प्रतिमात्रः परागतिः परवर्गी

गा॰ क्रूं॰ स॰ २५

प्रहारीच परवर्गनिरस्थिरः प्रतिपत्नाविरोधीच प्रतिपन्निधिवल्लभः प्रतीपचारी सूक्ष्मयोग प्रमेयात्मा प्रमाणविद् प्रतिसाधुः प्रकाशेभ्यः प्रकाशात्मा प्रकामकृत् परोपकारी शुद्धात्मा प्रतिमान प्रमाणतिः प्रपन्नो प्रस्थितः प्रेष्ठः प्रतिभाभावगः प्रभः पराङ्गमुखहृत्पादः पादविघ्नः पदेस्थितः पदज्ञः प्रपठः प्रोच्चः प्राचीनः प्रलयेस्थितः प्रोज्ञीयः परिकर्मगः प्रस्रुतः पानलंपटः प्रकर्षः पर्वसंलग्नः पर्वनाथः सुपर्विकः प्रमादः प्रवरः पाकी प्रलोकः प्रबलः फणी प्रकाशः प्रकलशवदः परिनीतः परागप्रगः प्रक्षत्रः प्रजनः प्रस्थः प्रोड्डीनजातिरक्षयः परीतः परभागाभ्रः परिगीतः

प्रमाणिकः प्रमाणितार्थकरः पाताधातात्ल
तलवासकः पनसः प्रोन्नसः पीनः पर्व
तलः पतङ्गवः पयोदधिप्रापः पीलः
पीलवः पीतविषकः पीतांबरः पीत
माल्यः प्रततः पीववासकः पानचक्रर
तः प्रेङ्खः प्रकामः प्रवलोन्मदः पत्निः प्री
यात्मकर्षात्मा प्रवीजः परिगः परमः प्र
ज्ञियार्थी प्रतोलाङ्घ्रिः पतिसाधुः प्रमान
वित् प्रहर्षी परिनीतात्मा प्रकृतात्मा प्र
लोमकः मत्यीकृतिः महाद्रूपो महात्मा
ही महाबलः मंत्री मंत्रकलाभिज्ञो मन्त्र
स्तुतिविधायकः मद्वी महार्थी मोक्षा
त्माधर्वर्यफलप्रदः स्वपनः सवनः
सर्वः सर्वात्मा सर्वलोकभवः संचारी सह
सो मीसोमपानरतः साक्षी सभ्यः सभा
पतिः साधुः संवीतोः हवकंदगः ह

ए॰ क्षं॰ स॰ ५९

58

शांतः श्रमणः शोभी सुभांगः श्रावणः सु
चिः शार्ङ्गगर्भोंगभूः रम्यः शाकलीशाक्रपा
लकः तुलसीवल्लभो राम्यापतिराजीव
लोचनः पितृपालो महीपालो गोपा
लो गोपवल्लभः स्वातीशामीशस्त्रिग्रीवः
शमीकः शांतवत्सलः शंकरप्रियइंदु
हस्वत्वमूर्तिर्विभावसुः प्रभावसुः प्र
सादाब्दः प्रसन्नः शुचिमानसः रविली
लाप्रदो भावगर्भो नागगानरतः स्वामी वि
शालेशो विशालाक्षो विलासी विभ्र
लोद्भवः स्वरूपी भीमकर्मा घोरो घोरा
र्थदर्शनः समः कार्यपरीनात्मा कष्ट
पो मदनो मयः विश्वस्फारी जगत्सखः
हृषो वृषगतिः वृषः सुवर्षः सकलः
दांतः आगमार्थविचक्षणः लीली
लीरसिकः कांतः देवकार्यार्थमूर्ति

भूतः सिद्धिदः सिद्धपूज्यश्च सिद्धीशः सि
द्धिसाधकः भावगम्यो भावपूज्यो भाव
शः भावनो र्भकः भक्तिगम्यो भक्तपालो
भक्तार्तिहृद्भवो भवः नास्तिभावोऽस्ति
भवो भवभाव्यार्थदायकः भविको वि
कलो भावो भावनावशगो भवः भवेशः
भवनो र्भव्यो भविष्यत्फलदायकः भूतो
भविष्यद्भवनं चैकं द्भवनस्थितः द्वारिके
शो दरी दूर्वाश्यामः कंदप्रभः प्रभः मि
थुनो मैथुनरतो कर्कटोऽकर्कटो कटी क
ठोरः कठिनः क्रूरः सिंहः सिंहपराक्रमः
नृपसिंहोऽश्वनिर्व्याघ्रः मननीदमनोदमः
कन्यारतो कनीयांश्च तुला तल्पो तुलार्थ्य
दः वृश्चिको विजनो धन्वी मकरः मकला
श्वीदः कुंभ कुंभक्रो भकर्णोऽरिर्मीनो मीन
विलोचनः द्वादशात्मा विश्वभौमो वपुः

ग॰ सं॰ म॰ २९

हृतिः शनैश्चरः सदावक्रगतिः केतुः ध्वज
हस्तः गदाधरः कीलकस्थः खेटपाली
खर्पटोखाटभेदनः प्रभाकरः समेता
त्माखोधारः खननः खगः घंटागणेशो
विघ्नेशो यमुनाकूलगः यमी अदिति
र्दितिपुत्रब्रह्मलक्ष्यादित्यस्वरूपभृत् इक्षे
शः ईशानाग्रजः उत्पलाक्षोः सदाशुचिः
उद्दण्डगणगह्वरकाराधिपः ऋर्णोकमला
धरः लृवर्णोभ्रूलृबीजाढ्यः एकऐका
रपूजितः बिंदुर्विसर्गः काद्यस्त्वखेनिर्गि
गतरूपभृत् चर्चरीगोड.वर्णोकश्चाड्ड
छबीजयोफदः जबीजपुत्रझीकार्थः
टजोटोडीनवत्सलः ढकाराग्रजोणव
र्णोवृत्तिलवर्गस्थालभोजनः दाताध
नीनतोनम्रजनाभीष्टफलप्रदः पंडि
तः पूर्वगः पूर्वः फणिभाशीर्षवेगोविराः

बालुर्वृद्धोजराहीनोबलीबालपराक्रमः
भक्तिप्रियोभगोभर्गोभगवान्भगपूजितः
मानीमन्नोमदोन्मादीमायप्रीतमदोयमः
यावोययातिप्रहृष्टयज्वायज्ञपतिर्यशाः रं
नारमेशोरमणोराघवोरंजनस्तथा लं
र्लेदमणभ्रान्ताचलस्वामीनाथोललनाप्रायः
वासुदेवोवसुर्वीसोवैश्यपनाथोविषगंपतिः
शंकरःपाशाभृन्मौलिसेवितोशरणपहार
कःषड्गुणातीतईश्वरःषड्वक्त्रप्रियदर्शी
नःसमःसोमपव्यातीतःसर्वेशःसर्व
साधकःहरिर्हर्यक्षपूज्यश्चहरिभीति
विनाशकःहरिहृत्प्रियोहर्ताहरोन्ट
हरिरूपभृत्हरिश्रेकोहरिस्यश्चहरिने
त्रोहरिप्रभःक्षमाशीलःक्षमीकांतः
क्षवक्त्राङ्कविभूषितःलज्जाढ्योर्लीलसोला

ग० सोल्लासभद्रो लीलमानसः अच्युतः कम
कृ० लाकान्तश्चामीकरविराजितः टङ्केशाला
स० रकेशश्च सनातपतिस्तनूनपात् पद्मिनी
५८ पः पद्मनाभः पद्मपत्रविलोचनः य
ज्ञिणीशो यज्ञपूज्यः यज्ञेशो यज्ञवाहनः
शारीशारविलोलश्च शारिकेशारिपू
जितः बलितो बलिहृद्बलाबलिबलप्रियः
ऽस्तमध्यमः वाचस्पतिर्महाकाव्यकर्ता
कामधुगाध्यायोः विश्वयोनिरमेयात्मा
बुद्धीबुद्धिविवर्धनः बोधनो बुद्धिहृ
द्बुद्धिशालिप्रियो बुधः ज्ञानीः
ज्ञानिप्रियो मानी मेधावी मधुसूद
नः मानेः स्तुत्यः स्तवः स्तोत्रमौनी
मनिजनार्चितः महेशानो महाम
कः कल्पान्तरूपः कवाहनः ऊवम

दीकचाक्रांतः कामिनीवल्लभः प्रियः कृजन्मनुव्रतोऽग्रिमकिंकिणी
वरोऽग्रणी केशवः किंशुकाली
नः कृत्स्नः कृतांतवापकः कामि
नीवशगः कामी विश्वरूपप्रदर्शी ॥
कः गुरुपुत्रप्रदानाचगुरुसेवारतो
गुणी गुणानीनोगुणाव्यंबसंभवे
विभवः प्रभुः महार्थदो महाकायो
महामेधो महागतिः महाप्राणो
णवैरेशो महारण्यनिवासभूः व्या
वहर्ती महामेरुगामी नागांतकारः
कः विश्वविश्वंभरोधीरः कविः सा
ख्यविचारकः सांख्याधीमहितः नः ५
सांख्यावानद्रिपरंश्वरः दाविणो

गा क्ष स॰ ५५

दक्षिणाचारी दक्षिणाफलदायकः
वामो वामफलाहारी वामाचारफ-
लापहः उग्रश्चो नित्यतृप्तात्मा मह-
र्द्धेः कपिशोत्करः व्रती व्रतफलप्र-
पूर्वतिनां फलदायकः सद्योमो
मंत्रपूतात्मा सुनीतिः सुखदायकः
निराकारो निराभासो निर्वासो निर्ण-
योनरः निर्निमेषो निरुद्योगो नि-
र्नीतिर्निरुपद्रवः निराभासी निरुद्धे-
सो निर्नामा निरुपद्रवः अनंतमो-
ऽप्यादर्शी गंभीरो भावगो ध्रुवः सर्व-
व्यापी महात्मा च गोपदासो महोन्न-
मः आनंदजो नंदसूनुर्नंदिनां दी-
प्रियो नदः नादात्मा नादकृन्नादो

नदीनाथोनगोचरः अनंगोमित्रकृ
न्मित्रोमैत्रीभूषोमहोत्सवः मुदितो
विदितोदित्योमखघ्नोः सदीक्षितः
अनिरुद्धोवासुदेवः प्रद्युम्नश्चंद्रमोम
खः संकर्षणोजगद्ब्रह्मः दैत्यदान
वसूदनः महारथोभीमकर्मावि
श्वकर्मामनोजवः अव्याजोव्याधि
तोः स्वामी भोगीमानीगदाग्रजः
शाश्वत्प्रसन्नः सर्वात्मा विश्वक्सेनो
महायवान् सुकर्मावज्रवृन्देघः स
मालीविघ्नतर्पकः आतपीवीनगो
रोपीसत्यसंपः सवीरहा आश्रमोवि
श्ववासाश्ववक्त्रीपकायनेक्षणः दा
मोदरोद्वारिकेशोदिक्पालोदशमी

ग ह॰ स॰ ३॰

प्रियः इन्द्रनीलवर्णितो धामा रत्नीशोरि
पिकावर: भुजंगमपरित्राता भुजंगोग्र
जविक्रमः भूभृत्सेव्यो भूरिकीर्तिर्भूरि
क्लेशावकृत्त्रयः समीचीनो मवोधान
उरुभोगी रत्निग्रदः नभोगगतिरक्ष
न्त्यो भूनवासासनो प्रियः भूभृन्निनेव
वारींद्रानजोजन्मविवर्जितः कल्या
णो भूर्महेशोऽर्च्यो माननीयः फलप्रदः
१०० ॥ इति नाम्नां सहस्रं तु परनम्रा
र्थसाधनम् वर्णमालामयं दिव्यमी
प्सितार्थफलप्रदम् रहस्यं परमं देव
वितवस्नेहान्प्रकाशितम् साधका
नां हितं देवि पुण्यदं सर्वपावनम्
अस्य स्मरणमात्रेण देवि तुलसीवनमध्य
गः पठेद्यः प्रातरुत्थाय मलभेत्सिद्धि

मुत्तमम् विद्यार्थी लभते विद्यां धने
प्सुर्धनमाप्नुयात् अपुत्रो लभते पुत्रां
वंशवृद्धिकरांशुभान् सर्वान्कामा
नवाप्नोति यत्पाठकरणात्प्रिये इदं
नामसहस्रं तु श्रीराधावल्लभस्य ते
गदितं गिरिजे भक्त्या गोपनीयं प्रयत्न
तः ॥ इति श्रीविश्वसारोद्धारे तंत्रे
श्रीराधाकृष्णस्यसहस्रनामसंपूर्णं ॥

ॐ अथ स्तोत्रराजं अधुना शृणु व
क्ष्यामि स्तोत्रराजमनुत्तमं यं विना नै
व मंत्रस्य स्थापनं सफलं भवेत् वि
नानेन न सिद्धि स्यात्पूजनस्य जप
स्य च सहस्रनामपाठस्य फलस्य स्तो
त्रं पठेत्सदा र संसारसिन्धुतरणिं

ग॰ क॰ श्लो॰ ११

प्रथममातरं यमाद्यं जपेन्नवमनोः कि
लकल्पकाले मुक्ताम्भितनववपुः
सकलं हि ध्याय ली नो भवेन्मारशि
वे समतराग मुक्तः यो मानवमनवमनोः
समन्तं हि तृतीयं बीजं जपेद्भु वि विशुद्ध
मतीरमायाः सोपीह त्रिवर्गतिसमृद्ध
मतीन्मराज्यं निष्कंटकं बल भन्तपुरु
कीर्तियुक्तः यः कामराजमपरं न
वभक्तियुक्तो बीजं स्मरेत्त्रिशिवको
कनदक्षविना नसोह कंदर्पसदा
नराः स्त्रियोपावं निपद्माहिगनत्र
पाभुवि कृस्यायेतिपदं मनोस्तव
नरोः श्रद्धान्वितोयः सदा मेचरूपा
मत्रभत्रभुंपठजिवस्मृत्वास लोके॰

प्रभुः प्राग्जन्मार्जितपापकोटिनि
चयं मुक्त्वा परं निष्कलं रूपं विश्ववि
वितृमद्भुततरं प्राप्नोति विष्णोः पद
म्। अनसीकुसुमोपमं प्रभानेन वशेो
विंदपदं नमंति ये नम। भुवि ते खलुपं
डिताः कवीनामृषभाः कीर्तियुता
भवंत्यवश्यम्। श्रीराधाप्रियवल्लभा
नि मनंतं सर्वार्थसिद्धिप्रदं बीजं तेन ख
लु मैकवर्णं विमलं ध्यायेद्यएवंशु
चिः सोऽप्यत्रेह च मानवो निरुपमं प्रा॰
प्नोति दिव्यं वपुः। लक्ष्म्याऽनेकजनस्य
तुः खलु निचयं विस्तृत्य भोगान्वरान्
पतं जपया ख्यबीजं ते मनोरंजितं न
रः केवलं जपनेयोमौ समं पन्नाथने

रा॰ कृ॰ स्तो॰ २२

इत्येवं स्तोत्रराजेशं मया स्नेहात्प्रका
शितम् नवभक्तायापि देवेशि कलौ
सर्वार्थसिद्धिदम् योगिनीसारसर्व
स्वं रहस्यं त्रिदिवौकसाम् न वाच्यं प
रशिष्याय भक्तिहीनाय सुंदरि वा
च्यं सद्गुरुभक्ताय सदाचारपराय च
सर्वरोगहरं सर्वज्वरातीसारकापहम्
सर्वागमरहस्यं च चतुर्वर्गफलप्रदं
अस्यैव पठनाद्विघ्ना भूताः प्रेतपि
शाचकाः नश्यंतिनन्दाणान्सर्वे स्तो
त्रराजस्य कीर्तनात् ॥ ॥
इति श्रीविश्वसारोद्धारे तंत्रे श्रीराधा
कृस्य पंचमांगस्तोत्रं समाप्तम् ॥

